Sri Kamakshi Kamakoti Sankara Foundation of Canada



अपार करुणा सिन्धुम् ज्ञानदम् शान्त रूपिनम्
श्री चन्द्रशेखर गुरुम् प्रणमामि मुदान्वहम्

# ॥ परब्रह्मस्वरूपी श्रीकाञ्ची कामकोटिपीठ जगद्गुरु श्रीचन्द्रशेखरेन्द्रसरस्वती सगुणोपासना ॥

{Version 2- June 2020}

## 1. Lighting the Lamp

शुभं करोति कल्याणं आरोग्यं धनसम्पदः ।

शत्रु  बुद्धि विनाशाय दीपज्योतिः नमोऽस्तु ते।।

दीपो ज्योतिः परं ब्रह्म;  दीपो ज्योतिः जनार्दनः ।

दीपो हरतु मे पापं  सन्ध्या दीपो नमोऽस्तु ते।।

{After lighting the lamp and keeping the poorna Kumbham and Arathi Ready, we request the presence of Paramacharya into our homes by offering him Poorna Kumbham and reciting Sanyasa Suktam.

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ।
परेण नाकं निहितं गुहायां विभ्राजदे तद्यतयो विशन्ति ॥१॥

वेदान्तविज्ञानसुनिश्चितार्थाः संन्यास योगाद्यतय शुद्धसत्त्वाः ।
तेब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे ॥२॥

दह्रं विपापं परमेश्मभूतं यत्पुण्डरीकं पुरमध्यसग्गस्थम् ।
तत्रापि दह्रं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम् ॥३॥

यो वेदाधौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥४॥

Once the Padukas and the poorna kumbham have been placed in the pooja location, we recite  Swasti Vachanam as per the next page}.

# स्वस्तिवाचनम् – गुरुवन्दनम्

श्री गुरुभ्यो नमः ॥

श्री महात्रिपुरसुन्दरी समेत श्री चन्द्रमौलीश्वराय नमः ।

श्री काञ्ची कामकोटि पीठाधिपति जगद्गुरु

श्री शङ्कराचार्य श्री चरणयोः प्रणामाः ।

स्वस्ति श्रीमदखिल भूमण्डलालङ्कार त्रयस्त्रिंशत्कोटि देवता सेवित श्री कामाक्षीदेवीसनाथ श्रीमदेकाम्रनाथ श्री महादेवीसनाथ श्रीहस्तिगिरिनाथ साक्षात्कार परमाधिष्ठान सत्यव्रत नामाङ्कित काञ्ची दिव्यक्षेत्रे शारदामठसुस्थितानां अतुलित सुधारस माधुर्य कमलासन कामिनी धम्मिल्ल सम्फुल्ल मल्लिका मालिका निष्यन्दमकरन्दझरी सौवस्तिक वाङ्निगुम्भ विजृम्भणानन्द तुन्दिलित मनीषिमण्डलानां अनवरत अद्वैत विद्याविनोदरसिकानां निरन्तरालङ्कृतीकृत शान्ति दान्तिभूम्नां सकल भुवनचक्रप्रतिष्ठापक श्रीचक्रप्रतिष्ठा विख्यात यशोऽलङ्कृतानां निखिल पाषण्ड षण्ड कण्टकोद्घाटनेन विशदीकृत वेदवेदान्तमार्ग षण्मतप्रतिष्ठापकाचार्याणां श्रीमत्परमहंस परिव्राजकाचार्यवर्य श्रीजगद्गुरु श्रीमच्छङ्कर भगवत्पादाचार्याणां अधिष्ठाने सिंहासनाभिषिक्त श्रीमत् **चन्द्रशेखरेन्द्रसरस्वती** संयमीन्द्राणां अन्तेवासिवर्य श्रीमत् **जयेन्द्र सरस्वती** श्रीपादानां तदन्तेवासिवर्य श्रीमत् **शङ्करविजयेन्द्र सरस्वती** श्री पादानां च चरणनलिनयोः सप्रश्रयं साञ्जलिबन्धं च नमस्कुर्मः ॥

## ॥ प्रार्थना ॥

**ओम्**

गणानाम् त्वा गणपतिम् हवामहे कविन् कवीनाम् उपमश्रवस्तमम्

ज्येष्टराजम् ब्रह्मणाम् ब्रह्मणस्पत आन शकृन्वन ऊतिभि: सीद सादनम्

श्रीमहागणपतये नमः ।

प्रणो देवी सरस्वती वाजेभिर् वाजिनीवती धीनामवित्र्यवतु

वाग्देव्यै नम:; श्री महा सरस्वत्यै नम:

गुरु ब्रह्मा, गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।

गुरुः साक्षात् परम्ब्रह्म तस्मै श्री गुरवे नमः ।

गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ।

निधये सर्वविद्यानां श्री दक्षिणा मूर्तये नमः ।

सदासिव समारम्भाम् शन्कराचार्य मध्यमाम् ।

अस्मत् आचार्य पर्यन्ताम् वन्दे गुरु परम्पराम् ॥

ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्या सम्प्रदाय कर्तृभ्यो वंशऋषिभ्यो महद्भ्यो नमो गुरुभ्य:। सर्वोपप्लवरहित: प्रग्यानघन: प्रत्यगर्थो ब्रह्मैव अहमस्मि: ॥

ओम् नारायनम् पद्मभवम् वसिष्ठम् शक्तिम् च तत्पुत्र पराशरम् च ।
व्यासम् शुकम् गौडपदम् महान्तम् गोविन्द योगीन्द्र मथास्य शिष्यम् ॥

श्री शन्कराचार्य मथास्य पद्मपादम्च हस्तामलक्म् च शिश्यम् । तम्
तोटकम् वार्तिककारम् अन्यान् अस्मत् गुरून् सन्ततमानतोस्मि ॥

श्रुति स्मृति पुराणानाम् आलयम् करुणालयम् ।

नमामि भगवद्पादम् सन्करम् लोक शन्करम् ॥

अपार करुणा सिन्धुम् ज्ञानदम् शान्त् रूपिनम्

श्री चन्द्रशेखर गुरुम् प्रणमामि मुदान्वहम् ॥

अस्मत् श्री गुरु चरणारविन्दाभ्यां नमः

इष्ट देवताब्यो नम:; ग्राम देवताब्यो नम:; कुल देवताब्यो नम:

ग्रुह देवताब्यो मम:; वास्तु देवताभ्यो नम:; नक्षत्र देवतब्यो नम:;

नवग्रह देवताब्यो नम:; समस्त हरिहर देवेताब्यो नमः ।

सर्वेभ्यो ब्राह्मणेभ्यो नमः ।

प्रारम्भकार्यं निर्विघ्नमस्तु । शुभं शोभनमस्तु ।

इष्टदेवता कुलदेवता सुप्रसन्ना वरदा भवतु ॥

## ॥ आसन विधि: ॥

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।
जगदिहिताय कृष्णाय गोविन्दाय नमो नमः|
आब्रह्मलोकादा शेषात् आलोकालोकपर्वतात्।
ये वसन्ति द्विजा देवाः तेभ्यो नित्यं नमो नमः।

अपसर्पन्तु ते भूता ये भूता भुविसंस्थिताः।
ये भूता विघ्नकर्तारः ते नश्यन्तु शिवाज्ञया |!
उग्रभूतापिशाचा:ये च वै भूमिघारकाः। एतेषामविरोधेन ब्रह्मकर्म समारभे।।
अपक्रामन्तु भूतानि पिशाचाःसवतोमुखम्। सर्वेषामविरोधेन पूजाकर्म समारभे।।

पृथि त्वया धृता लोकाः देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम्।।

## ॥ श्रीमहागणपतिपूजा ॥

### ॥ आचमनः ॥

ॐ अच्युताय नमः । ॐ अनन्ताय नमः । ॐ गोविन्दाय नमः ।
केशव । नारायण । माधव । गोविन्द । विष्णो ।
मधुसूदन । त्रिविक्रम । वामन । श्रीधर ।
हृषीकेश । पद्मनाभ । दामोदर ।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

**॥ प्राणायामः ॥**

Complete a prANAyAma by taking a deep breath

**॥ पवित्रपाणि: ॥**

ॐ ध्रुवन्ते राजावरुणो ध्रुवम् देवो वृहस्पतिः । ध्रुवं त इन्द्र्चाग्निश्च राष्ट्रम् धारयतां धुवम् ॥ उत्तरोत्तराभिव्रुद्धिरस्तु ।। दर्भेष्वासीनः, दर्भान् धारयमाणः ।।

**॥ सङ्कल्पः ॥**

मम उपात्त समस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं करिष्यमाणस्य कर्मणः निर्विघ्नेन परिसमाप्त्यर्थं आधौ श्रीमहागणपतिपूजां करिष्ये ।
तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥
अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदं तं भक्तानामेकदन्तमुपास्महे ॥

You can make a small image of shrImahAgaNapati with turmeric powder or worship a regular idol.

अस्मिन् हरिद्राबिम्बे श्रीमहागणपतिं ध्यायामि । आवाहयामि ।
ॐ महागणपतये नमः । आसनं समर्पयामि ।

ॐ महागणपतये नमः । पाद्यं समर्पयामि ।
ॐ महागणपतये नमः । अर्घ्यं समर्पयामि ।
ॐ महागणपतये नमः । आचमनीयं समर्पयामि ।
ॐ महागणपतये नमः । स्नानं समर्पयामि ।
ॐ महागणपतये नमः । स्नान्तरम् आचमनीयम् समर्पयामि ।
ॐ महागणपतये नमः । वस्त्रं समर्पयामि ।
ॐ महागणपतये नमः । यज्ञोपवीतं समर्पयामि ।
ॐ महागणपतये नमः । आभरणम् समर्पयामि ।
ॐ महागणपतये नमः । गन्धान् धारयामि ।
गन्धस्योपरि हरिध्रा कुम्कुमम् समर्पयामि ।
ॐ महागणपतये नमः । परिमलद्रव्यं समर्पयामि ।
ॐ महागणपतये नमः । पुष्पाणि समर्पयामि । पुष्पैः पूजयामि ।

ॐ सुमुखाय नमः ।
ॐ एकदन्ताय नमः ।
ॐ कपिलाय नमः ।
ॐ गजकर्णकाय नमः ।
ॐ लम्बोदराय नमः ।
ॐ विकटाय नमः ।
ॐ विघ्नराजाय नमः ।
ॐ गणाधिपाय नमः ।
ॐ धूम्रकेतवे नमः ।
ॐ गणाध्यक्षाय नमः ।
ॐ फालचन्द्राय नमः ।
ॐ गजाननाय नमः ।
ॐ वक्रतुण्डाय नमः ।

ॐ शूर्पकर्णाय नमः ।
ॐ हेरम्बाय नमः ।
ॐ स्कन्दपूर्वजाय नमः ।
ॐ श्री सिद्धि महागणपतये नमः । पुष्पाणि समर्पयामि ।

ॐ महागणपतये नमः । धूपमाघ्रापयामि ।
ॐ महागणपतये नमः । दीपं दर्शयामि ।
ॐ महागणपतये नमः । नैवेद्यं निवेदयामि ।
ॐ महागणपतये नमः । ताम्बूलं समर्पयामि ।
ॐ महागणपतये नमः । फलं समर्पयामि ।
ॐ महागणपतये नमः । नीराजनं दर्शयामि ।


" ओम् नमो व्रादपतये नमो गणपथये नम: प्रमत पथये
नमस्ते अस्तु लम्बोदराय एकदन्ताय विग्न विनासिने
सिव सुताय स्री वरदमूर्तये नमो नम:.."

ॐ महागणपतये नमः । मन्त्रपुष्पं समर्पयामि ।
ॐ महागणपतये नमः । प्रदक्षिणनमस्कारान् समर्पयामि ।
ॐ महागणपतये नमः । समस्त राजोपचारान् समर्पयामि ॥

॥ अथ प्रार्थना ॥

ॐ वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
ॐ भूर्भुवस्वः महागणपतये नमः । प्रार्थनां समर्पयामि ।
अनेक कोटि प्रदक्षिण नमस्कारान् समर्पयामि ।।
अनया पूजया विघ्नहर्ता महागणपतिः प्रीयताम् ॥

(If time permits, Ganapati Atharvaseersham can be chanted)



# **श्री दक्षिणामूर्ति स्तोत्रम्**

## **शान्तिपाठः**

ॐ यो ब्रह्माणं विदधाति पूर्वं । यो वै वेदांश्च प्रहिणोति तस्मै ।
तंहदेवमात्म बुद्धिप्रकाशं। मुमुक्षुर्वै शरणमहं प्रपद्ये ॥

## **ध्यानम्**

ॐ मौनव्याख्या प्रकटित परब्रह्मतत्वं युवानं
वर्शिष्ठान्तेवसदृषिगणैरावृतं ब्रह्मनिष्ठैः ।
आचार्येन्द्रं करकलित चिन्मुद्रमानन्दमूर्तिं
स्वात्मरामं मुदितवदनं दक्षिणामूर्तिमीडे ॥

वटविटपिसमीपे भूमिभागे निषण्णं
सकलमुनिजनानां ज्ञानदातारमारात् ।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं
जननमरणदुःखच्छेद दक्षं नमामि ॥

चित्रं वटतरोर्मूले वृद्धाः शिष्याः गुरुर्युवा ।
गुरोस्तु मौनव्याख्यानं शिष्यास्तुच्छिन्नसंशयाः ॥

ॐ नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
निर्मलाय प्रशान्ताय दक्षिणामूर्तये नमः ॥

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुस्साक्षात् परं ब्रह्मा तस्मै श्री गुरवे नमः ॥
निधये सर्वविद्यानां भिषजे भवरोगिणाम् ।
गुरवे सर्वलोकानां दक्षिणामूर्तये नमः ॥

ईश्वरो गुरुरात्मेति मूर्तिभेद विभागिने ।
व्योमवद् व्याप्तदेहाय दक्षिणामूर्तये नमः ॥

## अष्टकम्

विश्वन्दर्पण दृश्यमान नगरी तुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथानिद्रया ।
यस्साक्षात्कुरुते प्रभोधसमये स्वात्मानमे वाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्री दक्षिणामूर्तये ॥ 1 ॥

बीजस्यान्तति वाङ्कुरो जगदितं प्राङ्नर्विकल्पं पुनः
मायाकल्पित देशकालकलना वैचित्र्यचित्रीकृतम् ।
मायावीव विजृम्भयत्यपि महायोगीव यः स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्री दक्षिणामूर्तये ॥ 2 ॥

यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थकं भासते
साक्षात्तत्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।
यस्साक्षात्करणाद्भवेन्न पुरनावृत्तिर्भवाम्भोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्री दक्षिणामूर्तये ॥ 3 ॥

नानाच्छिद्र घटोदर स्थित महादीप प्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरण द्वारा बहिः स्पन्दते ।
जानामीति तमेव भान्तमनुभात्येतत्समस्तं जगत्
तस्मै श्री गुरुमूर्तये नम इदं श्री दक्षिणामूर्तये ॥ 4 ॥

देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्री बालान्ध जडोपमास्त्वहमिति भ्रान्ताभृशं वादिनः ।
मायाशक्ति विलासकल्पित महाव्यामोह संहारिणे
तस्मै श्री गुरुमूर्तये नम इदं श्री दक्षिणामूर्तये ॥ 5 ॥

राहुग्रस्त दिवाकरेन्दु सदृशो माया समाच्छादनात्
सन्मात्रः करणोप संहरणतो योऽभूत्सुषुप्तः पुमान् ।
प्रागस्वाप्समिति प्रभोदसमये यः प्रत्यभिज्ञायते
तस्मै श्री गुरुमूर्तये नम इदं श्री दक्षिणामूर्तये ॥ 6 ॥

बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्ता स्वनु वर्तमान महमित्यन्तः स्फुरन्तं सदा ।
स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया
तस्मै श्री गुरुमूर्तये नम इदं श्री दक्षिणामूर्तये ॥ 7 ॥

विश्वं पश्यति कार्यकारणतया स्वस्वामिसम्बन्धतः
शिष्यचार्यतया तथैव पितृ पुत्राद्यात्मना भेदतः ।
स्वप्ने जाग्रति वा य एष पुरुषो माया परिभ्रामितः
तस्मै श्री गुरुमूर्तये नम इदं श्री दक्षिणामूर्तये ॥ 8 ॥

भूरम्भांस्यनलो ~निलो ~म्बर महर्नाथो हिमांशुः पुमान्
इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।
नान्यत्किञ्चन विद्यते विमृशतां यस्मात्परस्माद्विभो
तस्मै गुरुमूर्तये नम इदं श्री दक्षिणामूर्तये ॥ 9 ॥

सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिन् स्तवे
तेनास्व श्रवणात्तदर्थ मननाद्ध्यानाच्च सङ्कीर्तनात् ।
सर्वात्मत्वमहाविभूति सहितं स्यादीश्वरत्वं स्वतः
सिद्ध्येत्तत्पुनरष्टधा परिणतं चैश्वर्य मव्याहतम् ॥ 10 ॥

## <u>॥ प्रधानपूजा सङ्कल्पः ॥</u>

मम उपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं

शुभे शोभने मुहूर्ते - अद्यब्रह्मणः द्वितीयपरार्धे श्रीश्वेतवराहकल्पे

वैवस्वतमन्वन्तरे - अष्टाविंशतितमे कलियुगे - प्रथमे पादे -

क्रौन्चद्वीपे ------ रमणकवर्षे ------ ऐन्द्रखण्डे उत्तर कनडा प्रदेशे, टोरोन्टो मिससिसागा नगरे, पस्चिमे पार्श्वे, ------ मेरोः

(you can change this based on your global location)

अस्मिन् वर्तमाने व्यवहारिके, प्रभवाति शष्टि सम्वत्सराणाम्  मध्ये

------ नाम संवत्सरे ------अयने ------ ऋतौ; ------ मासे ------ पक्षे ------ शुभतिथौ; ------नक्षत्रयुक्तायां ------ वासरयुक्तायां

(you can use the almanac to get the correct date)

शुभयोग शुभकरण एवं गुणविशेषेणविशिष्टायामस्यां .......शुभतिथौ

अस्मत् जगद्गुरु श्रीचन्द्रशेखरेन्द्रसरस्वती सद्गुरुप्रीत्यर्थं,

मम आत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्यर्थं

मम सकुटुम्बस्य क्षेमस्थैर्यवीर्यविजय आयुरारोग्य ऐश्वर्याभिवृद्ध्यर्थं

धर्मार्थकाममोक्ष चतुर्विध फल पुरुषार्थसिध्यर्थं

ज्ञानविवेकश्रुतधारणमेधावाक्त्वमादि सिद्ध्यर्थं

श्रीजगद्गुरु परिपूर्णगुरुकृपाकटाक्षसिद्ध्यर्थं

श्रीजगद्गुरु चन्द्रशेखरेन्द्रसरस्वती सद्गुरुपूजां

यथाशक्ति ध्यान आवाहनादि षोडशोपचारविधानेन करिष्ये ।

## ॥ विग्नेस्वर यदास्थानम् ॥

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।

निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

अस्मात् श्रीविघ्नेश्वरं यथास्थानं प्रतिष्ठापयामि ।

शोभनार्थे क्षेमाय पुनरागमनाय च ॥

(Ring bell)

क्षत्रस्य राजा वरुणोऽधिराजः । नक्षत्राणां शतभिषग्वसिष्ठः ।

तौ देवेभ्यः कृणुतो दीर्घमायुः । महागणपति प्रसाद सिद्धिरस्तु II

(Please humbly accept prasad and prostrate before the Remover of Obstacles - you may now keep the Lord in His original place)

## ॥ घण्टापूजा ॥

आगमार्थं तु देवानां गमनार्थन्तु राक्षसाम् ।

कुर्वे घण्टारवं तत्र देवताऽऽह्वानलाञ्छनम् ॥

इति घण्टानादं कृत्वा ॥

## ॥ कलशपूजा ॥

(५) कलश पूजा विधिः

कलशम् गन्ध-अक्षत-पत्र-पुष्पैः अभ्यर्च्य कलशम् स्प्रुष्च्वा

(fill pancha-paathram with water, daub chandan/kumkum on the four sides of the vessel)

ओम् कलशाय नमः दिव्यपरिमल गन्धान्धारयामि ।

ॐ गङ्गायै नमः । ॐ यमुनायै नमः । ॐ गोदावर्यै नमः । ॐ सरस्वत्यै नमः । ॐ नर्मदायै नमः । ॐ सिन्धवे नमः । ॐ कावेयै नमः। सप्त कोटि महातीर्थान् । आवाहयामि ।।

(keep your right palm facing down on the top of the panchapaathram and recite the following mantras )

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितौ ।

मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥

कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ।

ऋग्वेदोऽथ यजुर्वेदः सामवेदोप्यथर्वणः ॥

अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः ।

आयान्तु देवपूजार्थं दुरितक्षयकारकाः ॥

गङ्गे च यमुने कृष्णे गोदावरि सरस्वति ।

नर्मदे सिन्धु कावेरि तीर्थेऽस्मिन् सन्निधिं कुरु ॥

सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।

(Sprinkle water from Kalasham over pooja/abhisheka items and self)

ॐ इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमहम् सचता परिष्णया।

असिन्किया मरुद्धधे वितस्तयार्जी कीये शृणुह्या सुषोमया ॥

**॥ शङ्खपूजा ॥**

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।

देवैश्च पूजितः सर्वैः पाञ्चजन्य नमोऽस्तु ते ॥

श्रीपाञ्चजन्याय नमः ॥

पूजाद्रव्याणि प्रोक्ष्य देवमात्मानं च प्रोक्ष्य ॥

## ॥ आत्मपूजा ॥

ॐ आत्मने नमः । दिव्यपरिमल गन्धान् धारयामि ।

ॐ आत्मने नमः । ॐ अन्तरात्मने नमः । ॐ जीवात्मने नमः ।

ॐ योगात्मने नमः। ॐ परमात्मने नमः । ॐ ज्ञानात्मने नमः ।
समस्तोपचारान् समर्पयामि ।

देहो देवालयः प्रोक्तः जीवो देवः सनातनः ।

त्यजेदज्ञाननिर्माल्यं सोऽहं भावेन पूजयेत् ॥

## ॥ पीठपूजा ॥

ॐ सकलगुणात्मशक्तियुक्ताय योगपीठात्मने नमः ।

ॐ आधारशक्त्यै नमः ।

ॐ मूलप्रकृत्यै नमः ।

ॐ आदिवराहाय नमः ।

ॐ आदिकूर्माय नमः ।

ॐ अनन्ताय नमः ।

ॐ पृथिव्यै नमः ।

ॐ आदित्यादि नवग्रहदेवताभ्यो नमः ।

ॐ दशदिक्पालेभ्यो नमः ।

## ॥ द्वारपाल पूजा ॥

द्वारपाल पूजां करिष्ये ।

ॐ पूर्वद्वारे द्वारश्रिये नमः ॐ धात्रे नमः ॐ विधात्रे नमः ।

ॐ दक्षिणद्वारे द्वारश्रियै नमः ॐ गृहाय नमः ॐ गणपतये नम :।

ॐ पश्चिमद्वारे द्वारश्रियै नमः ॐ नन्दीश्वराय नमः ॐ क्षेत्रपालाय नमः ।

ॐ उत्तरद्वारे द्वारश्रियै नमः ॐ चण्डीश्वराय नमः ॐ भृङ्गीश्वराय नमः

ओम् ऊर्ध्वद्वारे द्वारश्रियै नमः ओम् आकाशाय नम: ॐ अन्तरिक्षाय नमः ।

ॐ अधोद्वारे द्वारश्रियै नमः ॐ भूम्यै नमः ॐ पातालय नमः ।

द्वारपाल पुजां समर्पयामि)

## ॥ कुम्भ आवाहनं – कुम्भस्थापनम् ॥

ॐ । ब्रह्म जज्ञानं प्रथमं पुरस्ताद् विसीमतस् सुरुचो वेन आवः,

सबुध्निया उपमा अस्य विष्ठास् सतश्च योनि मसतश्च विवः ॥

नाके सुपर्णं मुपयत्पतन्तं हृदा वेनन्तो अभ्यचक्ष तत्वा ॥

हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥

आप्यायस्व समेतु ते विश्वतस्सोम वृष्णियम् । भवा वाजस्य संगथे ॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश
तस्मै रुद्राय नमो अस्तु ॥ (अप उपस्पृश्य)

ॐ इदम् विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पागुम्सुरे

ॐ इन्द्रं विश्वा अवी वृधन्त्समुद्रव्यच संगिरो रथीतमगुम् रथीनां वाजानागुम् सत्पतिं पतिम् ॥

(Chant following while covering Kalasha with palm. This is the act of Sankalpam)

आपो वा इदगुम् सर्वं विश्वा भूतान्यापः प्राणा वा आपः पराव आपोऽन्नमापोऽमृतमापः सम्राडापो विराडापः स्वराडापड्छन्दाग्म्शस्यापो ज्योतीगुम्श्यापो यजूगुमष्यापस्सत्यमापस्सर्वा देवता आपो भूरभुवस्सुवराप ओं ॥

अपः प्रणयति । श्रद्धा वा आपः। श्रद्धां एवारभ्य प्रणीय प्रचरति! अपः प्रणयति । यज्ञो वा आपः। यज्ञं एवारभ्य प्रणीय प्रचरति । अपः प्रणयति । वज्रोवा आपः, वज्रमेवारभ्य प्रहुत्य प्रणीय प्रचरति । अपः प्रणयति। आपो वै रक्षोघ्नीः। रक्षसामपहत्ये । अपः प्रणयति | आपो वै देवानां प्रियंधाम , देवानामेव प्रियंधाम प्रणीय प्रचरति । अपः प्रणयति । आपो वै सर्वा देवताः! देवता एवारभ्य प्रणीय प्रचरति! आपो वै शान्ताः ।

शान्ताभिरेवास्य सुचगुम् शमयति ॥ देवोवस्सवितात्पुनात् । अच्छिद्रेण पवित्रेण । वशोसूर्यस्य रश्मिभिः ॥

ॐ सहि रत्नानि दाशुषे सुवाति; सविता भगः। तं भागं चित्रमीमहे ॥

**Kalasha Pooja**

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितौ ।

मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥

कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ।

ऋग्वेदोऽथ यजुर्वेदः सामवेदोप्यथर्वणः ॥

अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः ।

आयान्तु  समस्त देवपूजार्थं दुरितक्षयकारकाः ॥

गङ्गे च यमुने चैव गोदावरि सरस्वति ।

नर्मदे सिन्धु कावेरि तीर्थेऽस्मिन् सन्निधिं कुरु ॥

ॐ इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमहम् सचता परुष्निया।

असिन्किया मरुद्व्रुधे वितस्तयार्जी कीये श्रुणुहृया सुषोमया ॥

(Fill Kalash with water from Shanka)

कुम्भ अस्त्रेण संपरोक्षय ।

ॐ अनन्ताय नमः। ॐ धर्माय नमः। ॐ ज्ञानाय नमः|

ॐ वैराग्याय नमः। ॐ ऐश्वर्याय नमः। ॐ पद्माय नमः।

पद्मस्योपरि,  कुम्भ मूले - ॐ ब्रह्मणे नमः। कुम्भ मध्ये - ॐ विष्णवे नमः। कुम्भाग्रे ॐ रुद्राय नमः। ओष्टे ॐ स्कन्दाय नमः। `

ध्राणे - ॐ विघ्नेश्वराय नमः। कुक्षौ - ॐ वरुणाय नमः।

पाद्ये –  ओम् भास्कराय नमः। पार्स्र्वयोः - ॐ नन्दिने नमः। ॐ महाकालाय नमः ॥

ओम् गन्गायै नम:।  ओम् यमुनायै नम:।  ओम् नर्मदायै नम:। ओम् गोदावर्यै नम:। ओम् कावेर्यै नम:। ओम् ताम्रवर्णायै नम:। ओम् सरस्वत्यै नम:। ओम् सिन्ध्वे नम:। ओम् गन्गादि कोटि तीर्ठेभ्यो नम:॥

**VARUNA PUJA**

ॐ कटे वरुणाधि आवाहित देवताः सुप्रतिष्ठता वरदा भवन्तु ।

ॐ वरुणाधि आवाहित देवताभ्यो नमः।

ॐ वरूणाय नमः । ॐ वरुणमूर्तये नमः।

तत्वायामि ब्र्हमणा वन्दमानस्तदाशास्ते यजमानो हविभिः।

अहेडमानो वरुणेह बेध्युरुशगुम्स्स मा न आयुः प्रमोषीः ॥

अस्मिन् कुम्भे सकल तीर्थाधिपतिं वरुणं ध्यायामि ।

भूर्भुवस्सुवः वरुणमावाहयामि ।

ॐ वरुणाय नमः । रत्नसिम्हासन आसनं समंपयामि ।

1) पादयो: पाध्य्म् समर्पयामि ॥ (offer water in a bow})

2) हस्तयोः अर्घ्यं समपयामि ॥ (offer water in a bowl)

03) मुखे आचमनीयं समपयामि ॥ (offer water in a bowl)

04) स्नानं समर्पयामि | (sprinkle water with a flower on the Mandalam/Kumbam)

स्नानान्तरं आचमनीयं समपयामि | (offer water in a bowl)

05) वस्त्रं यज्ञोपवीतं आभरणानि (अक्षतान्) समर्पयामि ॥ (offer flowers/akshatai)

आचमनीयम् समर्पयामि | (offer water in a bowl)

06} गन्धम् समर्पयामि । (offer sandalwood paste)

आचमनीयं समंपयामि | (offer water in a bowl)

07) पुष्पम् समर्पयामि ॥ (offer flowers)

वरुण नामावलि

वरुणाय नमः। प्रचेतसे नमः। सरुपिणे नमः ।अपां पतये नमः।

मकरवाहनाय नमः! जलाधिपतये नमः। तीर्थराजाय नमः। पाशहस्ताय नमः। इति संपूज्य ।

धूपं आघ्रापयामि ।

दीपम् दर्शयामि ।

नैवेद्यम् समर्पयामि।

पूगी फल समायुग्मम्  नागवल्लीर्दलैर्युतम् ।

कर्पूर चूर्णं संयुक्तम्  तांबूलम् प्रतिगृह्यताम् ।

पूगी फल कर्पुर तांबूलम् समपंयामि ॥

नैवेध्यान्तरं आचमनीयं समपंयामि | (offer water in a bowl)

ॐ हिरण्यपात्रं मधोः पूर्णम् दधाति । मदव्योसानीति । एकधा ब्रह्मण उपहरति | एकदैव यजमान आयुस्तेजो दधाति।।

वरुणाय नमः । कपूर नीराजनं संदर्शयामि | (offer Camphor light. Circle lamp with flowers and offer to Mandalam/Kalash)

रक्ष रक्षान् धारयामि ।

आचमनीयं समर्पयामि । (offer water in a bowl)

12) मत्रंपुष्पं समर्पयामि ! 13) सुवर्णपुष्प दक्षिणां समर्पयामि ।

14) राजोपचारान समर्पयामि । 15) प्रार्थनां समर्पयामि !

16) प्रदक्षिण नमस्कारान् समर्पयामि । 17) नमस्करोमि । सकलाराधनैः स्वर्चितम् ॥

ॐ । जलबिम्बाय विद्महे नीलपरूषाय धीमहि । तन्नो वरुणःप्रचोद्यात ॥

ॐ अपां पतये वरुणाय नमः।

अनया पूजा वरुण देवता प्रीयन्ताम् ॥ वरुण देवता प्रसाद सिद्धिरस्तु ।

If time permits chant Punyahavachanam

# Paramacharya Pooja

## ॥ ध्यानम् ॥

विश्वव्यापिनमादिदेवममलं नित्यं परं निष्कलं
नित्योद्बुद्धसहस्रपत्रकमले लुप्ताक्षरे मण्डपे ।
नित्यानन्दमयं सुखैकनिलयं नित्यं शिवं स्वप्रभं
ध्याये हंसपरं परात्परतरं स्वच्छन्दसर्वागमम् ॥ 1॥

ऊर्ध्वाम्नाय गुरोः पदं त्रिभुवनौङ्काराख्यसिंहासनं
सिद्धाचारसमस्तवेदपठितं षट्चक्रसञ्चारिणम् ।
अद्वैतस्फुरदग्निमेकममलं पूर्णप्रभाशोभितं
शान्तं श्रीगुरुपङ्कजं भज मन चैतन्यचन्द्रोदयम् ॥ 2॥

तरुणतपनभासं चारुकाषायभूषं
करयुगधृतदण्डाभीतिमुद्राविलासम् ।
पदनतजनरक्षं पूर्णकारुण्यवीक्षं
गुरुमखिलजगत्याः कामकोटीशमीडे ॥ 3॥

प्रणौमि दक्षिणामूर्तिव्यासशङ्कररूपिणम् ।
ज्योतिर्मयं गुरुं श्रीमत् चन्द्रशेखरसरस्वतीम् ॥ 4॥

अपारकरुणासिन्धुं ज्ञानदं शान्तरूपिणम् ।
श्रीचन्द्रशेखरगुरुं प्रणमामि मुदान्वहम् ॥ 5॥

नमामि सद्गुरुं शान्तं प्रत्यक्षशिवरूपिणम् ।
शिरसा योगपीठस्थं मुक्तिकाम्यार्थसिद्धये ॥ 6॥

पादुका स्ताने भगवते श्रीकामकोटि चन्द्रशेखर सद्गुरुम् ध्यायामि ॥

**॥ आवाहनम् ॥**

त्वयान्वितं जगत्सर्वं तत्त्वमसि न संशयः ।

शून्याकारं निराकारं साकारं सर्वतोमुखम् ॥

मन्त्रराज महाराज योगिराज जगत्पते ।

सुवर्णवर्णः सर्वात्मा त्वमेकोऽसि जगद्गुरुः ॥

अस्मिन् पादुका स्थाने/बिम्भे श्री चन्द्रशेखर गुरुम् आवाहयामि ॥

(Hands clasped in prayer mode)

श्रीसद्गुरो! प्रभो!

आवाहितो भव; स्तापितो भव; सन्निहितो भव; सन्निरुथ्थो भव; सुमुखो भव; सुप्रसन्नो भव; वरदो भव ॥

**॥ आसनम् ॥**

येषु येषु च भावेषु भक्त्या त्वां परमेश्वर ।

साधवो भावयन्त्यात्मा त्वं तथा तत्र भाससे ॥

भेदाभेदौ न च स्थित्या मन्त्रराज जगत्पते ।

त्वमेवैकः परस्त्राता न चैवान्योऽस्ति तत्त्वतः ॥

भगवते श्रीकामकोटि चन्द्रशेखराय नमः । आसनं समर्पयामि ॥

**॥ पाद्यम् ॥**

सर्वतः पाणिपादं तद्रूपं जगन्नात्मकम् ।

न तन्नातद्विवेकेन विश्वेशं विदितं परम् ॥

भगवते श्रीकामकोटि चन्द्रशेखराय नमः । पादयोः पाद्यं समर्पयामि ॥

**॥ अर्घ्यम् ॥**

त्वमेव सर्वयोगानां भोक्ता साक्षी गुरुर्गतिः ।

फलं तत्कारणं बीजस्थानं त्वमसि तत्त्वतः ॥

भगवते श्रीकामकोटि चन्द्रशेखराय नमः ।

हस्तयोः अर्घ्यं समर्पयामि ॥

**॥ आचमनम् ॥**

अमृतादमृतं मर्त्या भजन्ति भवनाशनम् ।

मन्त्रराजमिदं पुण्यं दुःखाङ्कुरविमर्दनम् ॥

भगवते श्रीकामकोटि चन्द्रशेखराय नमः ।

मुखे आचमनीयं समर्पयामि ॥

**॥ स्नानम् ॥**

असङ्गो ह्यजरः साक्षी नित्यसिद्धो निरामयः ।

नित्यानन्दमयो देवः सर्वत्राप्यमलो बुधः ॥

भगवते श्रीकामकोटि चन्द्रशेखराय नमः । स्नानं समर्पयामि ॥

(Depending on your convenience you may perform rudrabishekam with lagunyasam and using the following dravyams in that order:

1. Water mixed with Turmeric Powder
2. Panchamrutam
3. Honey
4. Ghee
5. Milk
6. Yogurt
7. Sugar Cane Juice
8. Orange Juice
9. Coconut Water
10. Vibhooti
11. Sandalwood powder mixed with Rose water

After finishing the last abishekam, perform a small naivedyam.

श्रीकामकोटि चन्द्रशेखराय नमः । स्नानान्तरम् आचमनीयम् समर्पयामि

**॥ वस्त्र/यज्ञयोपवीत/गन्ध/अलन्कारान् ॥**

भगवते श्रीकामकोटि चन्द्रशेखराय नमः । वस्त्रं समर्पयामि ॥

भगवते श्रीकामकोटि चन्द्रशेखराय नमः । यज्ञोपवीतं समर्पयामि ॥

भगवते श्रीकामकोटि चन्द्रशेखराय नमः । दिव्य परिमल गन्धं समर्पयामि ॥

हरिद्रा कुन्कुमम् समर्पयामि ।

भगवते श्रीकामकोटि चन्द्रशेखराय नमः । आभरणान् समर्पयामि ॥

भगवते श्रीकामकोटि चन्द्रशेखराय नमः । अलङ्कारं समर्पयामि ॥

भगवते श्रीकामकोटि चन्द्रशेखराय नमः । अक्षतान् समर्पयामि ॥

भगवते श्रीकामकोटि चन्द्रशेखराय नमः । पुष्पान् समर्पयामि ॥

## ॥ अथाङ्गपूजा ॥

चिन्तितभक्तेष्टदायकाय नमः । गुरुपादुके पूजयामि ।

घोराधिकाघौघनिवारकाय नमः । पादतले पूजयामि ।

अव्याजकरुणामूर्तये नमः । पादाङ्गुलीः पूजयामि ।

श्रुतिसीमन्तसिन्दूरीकृतपादाब्जधूलिकाय नमः । पादौ पूजयामि ।

ब्रह्मात्मैक्यस्वरूपिणे नमः । जङ्घे पूजयामि ।

भावाभावविवर्जिताय नमः । जानुनी पूजयामि ।

आबालगोपविदिताय नमः । ऊरू पूजयामि ।

तत्पदलक्ष्यार्थाय नमः । कटिं पूजयामि ।

आब्रह्मकीटसृष्टिकर्त्रे नमः । नाभिं पूजयामि ।

सकलागमसन्दोहशुक्तिसम्पुटमौक्तिकाय नमः । उदरं पूजयामि ।

आश्रितवत्सलाय नमः । हृदयं पूजयामि ।

त्रिजगद्वन्द्याय नमः । स्कन्धौ पूजयामि ।

प्रधानपुरुषाय नमः । बाहून् पूजयामि ।

अभयवरदहस्ताय नमः । हस्तौ पूजयामि ।

नीलग्रीवाय नमः । कण्ठं पूजयामि ।

सद्योजात वामदेव अघोर तत्पुरुष ईशान इति पञ्चवक्त्र

पशुपतये नमः । मुखं पूजयामि ।

प्राणजीवनाय नमः । नासिकां पूजयामि ।

क्षराक्षरात्मिकाय नमः । कूर्चं पूजयामि ।

तापत्रयाग्निसन्तप्तसमाह्लादनपूर्णचन्द्रवदनाय नमः ।

मन्दस्मितं पूजयामि ।

भुजङ्गविलसत्कर्णाय नमः । कर्णौ पूजयामि ।

दृश्यदर्शनवर्जिताय नमः । नेत्रे पूजयामि ।

नित्यतृप्तात्मने नमः । फालं पूजयामि ।

शरच्चन्द्रकरोल्लसितशेखराय नमः । शिरः पूजयामि ।

साकिन्यम्बास्वरूपिणे नमः । मूलाधारं पूजयामि ।

काकिनी रूपधारिणे नमः । स्वाधिष्ठानं पूजयामि ।

लाकिन्यम्बास्वरूपिणे नमः । मणिपूरकं पूजयामि ।

राकिन्यम्बास्वरूपिणे नमः । अनाहतचक्रं पूजयामि ।

डाकिनीश्वरीस्वरूपिणे नमः । विशुद्धिचक्रं पूजयामि ।

हाकिनीरूपधारिणे नमः । आज्ञाचक्रं पूजयामि ।

याकिन्यम्बास्वरूपिणे नमः । सहस्रदलं पूजयामि ।

श्रीचन्द्रशेखरेन्द्र सरस्वती सद्गुरुभ्यो नमः ।

सर्वाण्यङ्गानि पूजयामि ।

॥ अष्टोत्तरशतनामावलिः ॥

श्रीकामाक्ष्यष्टोत्तरशतनामावली ॥

*सिन्दूरारुण विग्रहां त्रिनयनां माणिक्यमौलि स्फुरत्*

*तारा नायक शेखरां स्मितमुखी मापीन वक्षोरुहाम् ।*

*पाणिभ्यामलिपूर्ण रत्न चषकं रक्तोत्पलं बिभ्रतीं*

*सौम्यां रत्न घटस्थ रक्तचरणां ध्यायेत् परामम्बिकाम् ॥*

ॐ श्री कालकण्ठ्यै नमः

ॐ श्री त्रिपुरायै नमः ।

ॐ श्री बालायै नमः ।

ॐ श्री मायायै नमः ।

ॐ श्री त्रिपुरसुन्दर्यै नमः ।

ॐ श्री सुन्दर्यै नमः ।

ॐ श्री सौभाग्यवत्यै नमः ।

ॐ श्री क्लीङ्कार्यै नमः ।

ॐ श्री सर्वमङ्गलायै नमः ।

ॐ श्री ऐङ्कार्यै नमः । १०

ॐ श्री स्कन्दजनन्यै नमः ।

ॐ श्री परायै नमः ।

ॐ श्री पञ्चदशाक्षर्यै नमः ।

ॐ श्री त्रैलोक्यमोहनाधीशायै नमः ।

ॐ श्री सर्वाशापूरवल्लभायै नमः ।

ॐ श्री सर्वसङ्क्षोभणाधीशायै नमः ।

ॐ श्री सर्वसौभाग्यवल्लभायै नमः ।

ॐ श्री सर्वार्थसाधकाधीशायै नमः ।

ॐ श्री सर्वरक्षाकराधिपायै नमः ।

ॐ श्री सर्वरोगहराधीशायै नमः । २०

ॐ श्री सर्वसिद्धिप्रदाधिपायै नमः ।

ॐ श्री सर्वानन्दमयाधीशायै नमः ।

ॐ श्री योगिनीचक्रनायिकायै नमः ।

ॐ श्री भक्तानुरक्तायै नमः ।

ॐ श्री रक्ताङ्ग्यै नमः ।

ॐ श्री शङ्करार्धान्ग शरीरिण्यै नमः ।

ॐ श्री पुष्पबाणेक्षुकोदण्डपाशाङ्कुशकरायै नमः ।

ॐ श्री उज्वलायै नमः ।

ॐ श्री सच्चिदानन्दलहर्यै नमः ।

ॐ श्री श्रीविद्यायै नमः । ३०

ॐ श्री परमेश्वर्यै नमः ।

ॐ श्री अनङ्गकुसुमोद्यानायै नमः ।

ॐ श्री चक्रेश्वर्यै नमः ।

ॐ श्री भुवनेश्वर्यै नमः ।

ॐ श्री गुप्तायै नमः ।

ॐ श्री गुप्ततरायै नमः ।

ॐ श्री नित्यायै नमः ।

ॐ श्री नित्यक्लिन्नायै नमः ।

ॐ श्री मदद्रवायै नमः ।

ॐ श्री मोहिण्यै नमः । ४०

ॐ श्री परमानन्दायै नमः ।

ॐ श्री कामेश्यै नमः ।

ॐ श्री तरुणीकलायै नमः ।

ॐ श्री कलावत्यै नमः ।

ॐ श्री भगवत्यै नमः ।

ॐ श्री पद्मरागकिरीटायै नमः ।

ॐ श्री रक्तवस्त्रायै नमः ।

ॐ श्री रक्तभूषायै नमः ।

ॐ श्री रक्तगन्धानुलेपनायै नमः ।

ॐ श्री सौगन्धिकलसद्वेण्यै नमः । ५०

ॐ श्री मन्त्रिण्यै नमः ।

ॐ श्री तन्त्ररूपिण्यै नमः ।

ॐ श्री तत्वमय्यै नमः ।

ॐ श्री सिद्धान्तपुरवासिन्यै नमः ।

ॐ श्री श्रीमत्यै नमः ।

ॐ श्री चिन्मय्यै नमः ।

ॐ श्री देव्यै नमः ।

ॐ श्री कौलिन्यै नमः ।

ॐ श्री परदेवतायै नमः ।

ॐ श्री कैवल्यरेखायै नमः । ६०

ॐ श्री वशिन्यै नमः ।

ॐ श्री सर्वेश्वर्यै नमः ।

ॐ श्री सर्वमातृकायै नमः ।

ॐ श्री विष्णुस्वस्रे नमः ।

ॐ श्री वेदमय्यै नमः ।

ॐ श्री सर्वसम्पत्प्रदायिन्यै नमः ।

ॐ श्री किङ्करीभूतगीर्वाण्यै नमः ।

ॐ श्री सुतावापिविनोदिन्यै नमः ।

ॐ श्री मणिपूरसमासीनायै नमः ।

ॐ श्री अनाहताब्जवासिन्यै नमः । ७०

ॐ श्री विशुद्धिचक्रनिलयायै नमः ।

ॐ श्री आज्ञापद्मनिवासिन्यै नमः ।

ॐ श्री अष्टत्रिंशत्कलामूर्त्यै नमः ।

ॐ श्री सुषुम्नाद्वारमध्यकायै नमः ।

ॐ श्री योगीश्वरमनोध्येयायै नमः ।

ॐ श्री परब्रह्मस्वरूपिण्यै नमः ।

ॐ श्री चतुर्भुजायै नमः ।

ॐ श्री चन्द्रचूडायै नमः ।

ॐ श्री पुराणागमरूपिण्यै नमः ।

ॐ श्री ओङ्कार्यै नमः । ८०

ॐ श्री विमलायै नमः ।

ॐ श्री विद्यायै नमः ।

ॐ श्री पञ्चप्रणवरूपिण्यै नमः ।

ॐ श्री भूतेश्वर्यै नमः ।

ॐ श्री भूतमय्यै नमः ।

ॐ श्री पञ्चाशत्पीठरूपिण्यै नमः ।

ॐ श्री षोडान्यासमहारूपिण्यै नमः ।

ॐ श्री कामाक्ष्यै नमः ।

ॐ श्री दशमातृकायै नमः ।

ॐ श्री आधारशक्त्यै नमः । ९०

ॐ श्री अरुणायै नमः ।

ॐ श्री लक्ष्म्यै नमः ।

ॐ श्री त्रिपुरभैरव्यै नमः ।

ॐ श्री रहःपूजासमालोलायै नमः ।

ॐ श्री रहोयन्त्रस्वरूपिण्यै नमः ।

ॐ श्री त्रिकोणमध्यनिलयायै नमः ।

ॐ श्री बिन्दुमण्डलवासिन्यै नमः ।

ॐ श्री वसुकोणपुरावासायै नमः ।

ॐ श्री दशारद्वयवासिन्यै नमः ।

ॐ श्री चतुर्दशारचक्रस्थायै नमः । १००

ॐ श्री वसुपद्मनिवासिन्यै नमः ।

ॐ श्री स्वराब्जपत्रनिलयायै नमः ।

ॐ श्री वृत्तत्रयवासिन्यै नमः ।

ॐ श्री चतुरस्रस्वरूपायै नमः ।

ॐ श्री नवचक्रस्वरूपिण्यै नमः ।

ॐ श्री महानित्यायै नमः ।

ॐ श्री विजयायै नमः ।

ॐ श्री श्रीराजराजेश्वर्यै नमः ॥ १०८

**इति श्री कामाक्ष्यष्टोत्तरशत नामावलिः समाप्ता ॥**

## श्रीशिव अष्टोत्तरशतनामावलिः

*वन्दे शम्भुमुमापतिं सुरगुरुं वन्दे जगत्कारणं*

*वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनाम्पतिम् ।*

*वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं*

*वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥*

ॐ शिवाय नमः

ॐ महेश्वराय नमः

ॐ शम्भवे नमः

ॐ पिनाकिने नमः

ॐ शशिशेखराय नमः

ॐ वामदेवाय नमः

ॐ विरूपाक्षाय नमः

ॐ कपर्दिने नमः

ॐ नीललोहिताय नमः

ॐ शङ्कराय नमः (10)

ॐ शूलपाणये नमः

ॐ खट्वाङ्गिने नमः

ॐ विष्णुवल्लभाय नमः

ॐ शिपिविष्टाय नमः

ॐ अम्बिकानाथाय नमः

ॐ श्रीकण्ठाय नमः

ॐ भक्तवत्सलाय नमः

ॐ भवाय नमः

ॐ शर्वाय नमः

ॐ त्रिलोकेशाय नमः (20)

ॐ शितिकण्ठाय नमः

ॐ शिवाप्रियाय नमः

ॐ उग्राय नमः

ॐ कपालिने नमः

ॐ कौमारये नमः

ॐ अन्धकासुर सूदनाय नमः

ॐ गङ्गाधराय नमः

ॐ ललाटाक्षाय नमः

ॐ कालकालाय नमः

ॐ कृपानिधये नमः (30)

ॐ भीमाय नमः

ॐ परशुहस्ताय नमः

ॐ मृगपाणये नमः

ॐ जटाधराय नमः

ॐ कैलासवासिने नमः

ॐ कवचिने नमः

ॐ कठोराय नमः

ॐ त्रिपुरान्तकाय नमः

ॐ वृषाङ्काय नमः

ॐ वृषभारूढाय नमः (40)

ॐ भस्मोद्धूलित विग्रहाय नमः

ॐ सामप्रियाय नमः

ॐ स्वरमयाय नमः

ॐ त्रयीमूर्तये नमः

ॐ अनीश्वराय नमः

ॐ सर्वज्ञाय नमः

ॐ परमात्मने नमः

ॐ सोमसूर्याग्नि लोचनाय नमः

ॐ हविषे नमः

ॐ यज्ञमयाय नमः (50)

ॐ सोमाय नमः

ॐ पञ्चवक्त्राय नमः

ॐ सदाशिवाय नमः

ॐ विश्वेश्वराय नमः

ॐ वीरभद्राय नमः

ॐ गणनाथाय नमः

ॐ प्रजापतये नमः

ॐ हिरण्यरेतसे नमः

ॐ दुर्धर्षाय नमः

ॐ गिरीशाय नमः (60)

ॐ गिरिशाय नमः

ॐ अनघाय नमः

ॐ भुजङ्ग भूषणाय नमः

ॐ भर्गाय नमः

ॐ गिरिधन्वने नमः

ॐ गिरिप्रियाय नमः

ॐ कृत्तिवाससे नमः

ॐ पुरारातये नमः

ॐ भगवते नमः

ॐ प्रमधाधिपाय नमः (70)

ॐ मृत्युञ्जयाय नमः

ॐ सूक्ष्मतनवे नमः

ॐ जगद्व्यापिने नमः

ॐ जगद्गुरवे नमः

ॐ व्योमकेशाय नमः

ॐ महासेन जनकाय नमः

ॐ चारुविक्रमाय नमः

ॐ रुद्राय नमः

ॐ भूतपतये नमः

ॐ स्थाणवे नमः (80)

ॐ अहिर्भुथ्न्याय नमः

ॐ दिगम्बराय नमः

ॐ अष्टमूर्तये नमः

ॐ अनेकात्मने नमः

ॐ सात्विकाय नमः

ॐ शुद्धविग्रहाय नमः

ॐ शाश्वताय नमः

ॐ खण्डपरशवे नमः

ॐ अजाय नमः

ॐ पाशविमोचकाय नमः (90)

ॐ मृडाय नमः

ॐ पशुपतये नमः

ॐ देवाय नमः

ॐ महादेवाय नमः

ॐ अव्ययाय नमः

ॐ हरये नमः

ॐ पूषदन्तभिदे नमः

ॐ अव्यग्राय नमः

ॐ दक्षाध्वरहराय नमः

ॐ हराय नमः (100)

ॐ भगनेत्रभिदे नमः

ॐ अव्यक्ताय नमः

ॐ सहस्राक्षाय नमः

ॐ सहस्रपदे नमः

ॐ अपवर्गप्रदाय नमः

ॐ अनन्ताय नमः

ॐ तारकाय नमः

ॐ परमेश्वराय नमः (108)

**<u>श्रीकाञ्चीकामकोटिपीठाधीश्वर जगद्गुरु</u>**

**<u>श्रीश्रीचन्द्रशेखरेन्द्रसरस्वती अष्टोत्तरशत नामावलिः ।</u>**

*अपार करुणा सिन्धुम् ज्ञानदम् शान्त् रूपिनम् ।*

*श्री चन्द्रशेखर गुरुम् प्रणमामि मुदान्वहम् ॥*

ॐ श्रीकाञ्चीकामकोटिपीठाधीश्वराय नमः ।

ॐ श्रीचन्द्रशेखरेन्द्रसरस्वतीगुरुभ्यो नमः ।

ॐ संन्यासाश्रमशिखराय नमः ।

ॐ काषायदण्डधारिणे नमः ।

ॐ सर्वपीडापहारिणे नमः ।

ॐ स्वामिनाथगुरवे नमः ।

ॐ करुणासागराय नमः ।

ॐ जगदाकर्षणशक्तिमते नमः ।

ॐ सर्वसराचरहृदयस्थाय नमः ।

ॐ भक्तपरिपालकश्रेष्ठाय नमः । १०

ॐ धर्मपरिपालकाय नमः ।

ॐ श्रीजयेन्द्रसरस्वत्याचार्याय नमः ।

ॐ श्रीविजयेन्द्रसरस्वतीपूजिताय नमः ।

ॐ शिवशक्तिस्वरूपाय नमः ।

ॐ भक्तजनप्रियाय नमः ।

ॐ ब्रह्मविष्णुशिवैक्यस्वरूपाय नमः ।

ॐ काञ्चीक्षेत्रवासाय नमः ।

ॐ कैलाशशिखरवासाय नमः ।

ॐ स्वधर्मपरिपोषकाय नमः ।

ॐ चातुर्वर्ण्यसंरक्षकाय नमः । २०

ॐ लोकरक्षणसङ्कल्पाय नमः ।

ॐ ब्रह्मनिष्ठापराय नमः ।

ॐ सर्वपापहराय नमः ।

ॐ धर्मरक्षणसन्तुष्टाय नमः ।

ॐ भक्तार्पितधनस्वीकर्त्रे नमः ।

ॐ सर्वोपनिषत्सारज्ञाय नमः ।

ॐ सर्वशास्त्रगम्याय नमः ।

ॐ सर्वलोकपितामहाय नमः ।

ॐ भक्ताभीष्टप्रदायकाय नमः ।

ॐ ब्रह्मण्यपोषकाय नमः । ३०

ॐ नानविधपुष्पार्चितपदाय नमः ।

ॐ रुद्राक्षकिरीटधारिणे नमः ।

ॐ भस्मोद्धूलितविग्रहाय नमः ।

ॐ सर्वज्ञाय नमः ।

ॐ सर्वचराचरव्यापकाय नमः ।

ॐ अनेकशिष्यपरिपालकाय नमः ।

ॐ मनश्चाञ्चल्यनिवर्तकाय नमः ।

ॐ अभयहस्ताय नमः ।

ॐ भयापहाय नमः ।

ॐ यज्ञपुरुषाय नमः । ४०

ॐ यज्ञानुष्ठानरुचिप्रदाय नमः ।

ॐ यज्ञसम्पन्नाय नमः ।

ॐ यज्ञसहायकाय नमः ।

ॐ यज्ञफलदाय नमः ।

ॐ यज्ञप्रियाय नमः ।

ॐ उपमानरहिताय नमः ।

ॐ स्फटिकतुलसीरुद्राक्षहारधारिणे नमः ।

ॐ चातुर्वर्ण्यसमदृष्टये नमः ।

ॐ ऋग्य़जुस्सामाथर्वणचतुर्वेदसंरक्षकाय नमः ।

ॐ दक्षिणामूर्तिस्वरूपाय नमः । ५०

ॐ जाग्रत्स्वप्नसुषुत्प्यवस्थातीताय नमः ।

ॐ कोटिसूर्यतुल्यतेजोमयशरीराय नमः ।

ॐ साधुसङ्घसंरक्षकाय नमः ।

ॐ अश्वगजगोपूजानिर्वर्तकाय नमः ।

ॐ गुरुपादुकापूजाधुरन्धराय नमः ।

ॐ कनकाभिषिक्ताय नमः ।

ॐ स्वर्णबिल्वदलपूजिताय नमः ।

ॐ सर्वजीवमोक्षदाय नमः ।

ॐ मूकवाग्दाननिपुणाय नमः ।

ॐ नेत्रदीक्षादानाय नमः । ६०

ॐ द्वादशलिङ्गस्थापकाय नमः ।

ॐ गानरसज्ञाय नमः ।

ॐ ब्रह्मज्ञानोपदेशकाय नमः ।

ॐ सकलकलासिद्धिदाय नमः ।

ॐ चातुर्वर्ण्यपूजिताय नमः ।

ॐ अनेकभाषासम्भाषणकोविदाय नमः ।

ॐ अष्टसिद्धिप्रदायकाय नमः ।

ॐ श्रीशारदामठसुस्थिताय नमः ।

ॐ नित्यान्नदानसुप्रीताय नमः ।

ॐ प्रार्थनामात्रसुलभाय नमः । ७०

ॐ पादयात्राप्रियाय नमः ।

ॐ नानाविधमतपण्डिताय नमः ।

ॐ श्रुतिस्मृतिपुराणज्ञाय नमः ।

ॐ देवयक्षकिन्नरकिंपुरुषपूज्याय नमः ।

ॐ श्रवणानन्दकरकीर्तये नमः ।

ॐ दर्शनानन्दाय नमः ।

ॐ अद्वैतानन्दभरिताय नमः ।

ॐ अव्याजकरुणामूर्तये नमः ।

ॐ शैववैष्णवादिमान्याय नमः ।

ॐ शङ्कराचार्याय नमः । ८०

ॐ दण्डकमण्डलुहस्ताय नमः ।

ॐ वीणामृदङ्गादिसकलवाद्यनादस्वरूपाय नमः ।

ॐ रामकथारसिकाय नमः ।

ॐ वेदवेदाङ्गागमादि सकलकलासदःप्रवर्तकाय नमः ।

ॐ हृदयगुहाशयाय नमः ।

ॐ शतरुद्रीयवर्णितस्वरूपाय नमः ।

ॐ केदारेश्वरनाथाय नमः ।

ॐ अविद्यानाशकाय नमः ।

ॐ निष्कामकर्मोपदेशकाय नमः ।

ॐ लघुभक्तिमार्गोपदेशकाय नमः । ९०

ॐ लिङ्गस्वरूपाय नमः ।

ॐ सालग्रामसूक्ष्मस्वरूपाय नमः ।

ॐ कालट्यांशङ्करकीर्तिस्तम्भनिर्माणकर्त्रे नमः ।

ॐ जितेन्द्रियाय नमः ।

ॐ शरणागतवत्सलाय नमः ।

ॐ श्रीशैलशिखरवासाय नमः ।

ॐ डमरुकनादविनोदाय नमः ।

ॐ वृषभारूढाय नमः ।

ॐ दुर्मतनाशकाय नमः ।

ॐ आभिचारिकदोषहर्त्रे नमः । १००

ॐ मिताहाराय नमः ।

ॐ मृत्युविमोचनशक्ताय नमः ।

ॐ श्रीचक्रार्चनतत्पराय नमः ।

ॐ दासानुग्रहकारकाय नमः ।

ॐ अनुराधानक्षत्रजाताय नमः ।

ॐ सर्वलोकख्यातशीलाय नमः ।

ॐ वेङ्कटेश्वरचरणपद्मषट्पदाय नमः ।

ॐ श्रीत्रिपुरसुन्दरीसमेतश्रीचन्द्रमौलीश्वरपूजाप्रियाय नमः ॥

## ॥ धूपः ॥

दसान्गम् गुग्गुलम् दूपम् सुगन्धन्च सुमनोहरम् ।

आघ्रेय सर्वदेवानाम् धूपोयम् प्रतिघ्रुह्यताम् ॥

भगवते श्रीकामकोटि चन्द्रशेखराय नमः, आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः। धूपमाघ्रापयामि ॥

## ॥ दीपम् ॥

साज्यन्त्रिवर्ति सम्युक्तम् वह्निना योजितम् मया

ग्रुहाण मन्गलम् दीपं ! त्रैलोक्यतिमिरापहम्

भगवते श्रीकामकोटि चन्द्रशेखराय नमः, आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः। दीपं दर्शयामि ॥

## ॥ नैवेद्यम् ॥

ॐ भूर्भुवःसुवः: तत्सवितुर्वरेण्यं + ब्रह्मणे स्वाहा ।

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः, माध्वीर्न : सन्त्वोषधीः |
मधुनक्तमुतोषसि, मधुमत्पा्थिवग्गुम्  रजः। मधु द्यौरस्तु नः पिता।

मधुमान्नो वनस्पतिर्मधुमाग्म अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः।

मधु मधु मधु ॥

भगवते श्रीकामकोटि चन्द्रशेखराय नमः, आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः

शाल्यन्नं पायसं क्षीरं लड्ढुकान् मोदकानपि ।

गृहाण कृपया देव फलानि सुबहुनिच ॥

महानैवेद्यं निवेदयामि ॥ मध्ये मध्ये अमृत पानीयं समर्पयामि । अमृतोपिधान्यमसि । नैवेद्यान्तरं आचमनीयं समर्पयामि ॥

हस्तप्रक्षालनं समर्पयामि। पादप्रक्षालनं समर्पयामि। आचमनीयम् समर्पयामि । पुनराचमनीयं समर्पयामि। भूर्भुवःसुवः

**॥ फलं, ताम्बूलं ॥**

पूगीफल समायुक्तम् नागवल्लि दलीरतम् ।

करपूर चूर्ण सम्युक्तम् ताम्बूलम् प्रतिघ्रुह्यताम् ॥

भगवते श्रीकामकोटि चन्द्रशेखराय नमः, आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः ताम्बूलं समर्पयामि ॥

**॥ दक्षिणा ॥**

अदृश्यं दृश्यते दृश्यं तद्दृश्यं दृश्यते न हि । दृश्यादृश्यविदृश्यत्वाद्रूपं ते मङ्गलं परम् ॥

भगवते श्रीकामकोटि चन्द्रशेखराय नमः, आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः। दक्षिणां समर्पयामि ॥

**॥ कर्पूर नीराजन दीपः ॥**

बहुग्वै बह्वश्वायै बह्वजाविकायै । बहुब्रीहि यवायै बहुमाशातिलायै । बहुहिरण्यायै, बहुहस्तिकायै । बहुदासपूरुषायै रयिमत्यै पुष्टिमत्यै । बहुरायस्पोषायै राजाऽस्तु ।

नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय
त्रिकाग्निकालाय कालाग्नि रुध्राय, नीलकण्ठाय मृत्युज्याय सर्वेश्वराय
सदाङिवाय शन्कराय श्रीमन्महादेवाय नमः

अपार करुणा सिन्धुम् ञानदम् शान्त् रूपिनम्

श्री चन्द्रशेखर गुरुम् प्रणमामि मुदान्वहम् ॥

भगवते श्रीकामकोटि चन्द्रशेखराय नमः, आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः। नीराजनम् सन्दर्शयामि । नीराजनानन्तरं आचमनीयं समर्पयामि॥

इन्द्रस्तोमेन पञ्चदशेन मध्यमिदं वातेन सगरेण रक्ष।

कर्पूर रक्षां धारयामि ।। {इति नीराजनरक्षा धारयेत्}

**॥ प्रदक्षिणनमस्काराः ॥**

स्वर्भू पाताल लोकेषु यः पर्यटति नित्यशः ।

प्रदक्षिणं करोमीह सद्गुरुं पादचारतः ।

भगवते श्रीकामकोटि चन्द्रशेखराय नमः, आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः। प्रदक्षिणनमस्कारान् समर्पयामि ।

**॥ मन्त्रपुष्पाञ्जलिः ॥**

यो॑ऽपां पुष्पं॒ वेद॑। पुष्प॑वान् प्र॒जावा□न् पशु॒मान् भ॑वति ।

च॒न्द्रमा॒ वा अ॒पां पुष्पम्□। पुष्प॑वान् प्र॒जावा□न् पशु॒मान् भ॑वति ।

य ए॒वं वेद॑ । यो॑ऽपामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ॥

भगवते श्रीकामकोटि चन्द्रशेखराय नमः, आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः। मन्त्रपुष्पं समर्पयामि । स्वर्ण पुष्पम् समर्पयामि॥

## ॥ चतुर् वेद समर्पनम् ॥

ॐ स्वस्ति ॐ देवदेवोत्तमा देवतासार्वभौमा अखिलान्डकोठी

ब्रह्माण्डनायका श्री चन्द्रशेकर सत्गुरो: ऋग्वेदः प्रिया ऋग्वेद अवधारया |

हरि: ओम् ।

अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म् । होता॑रं रत्न॒धात॑मम् ॥

हरि: ओम्॥

हरि: ओम् ।

इ॒षे त्वो॒र्जेत्वा॑ वा॒यव॑स्थो पा॒यव॑स्थ दे॒वो व॑स्सवि॒ता प्रार्प॑यतु॒

श्रेष्ठ॑तमाय॒ कर्म॑णे॥

आप्या॑यध्वमघ्निया देवभा॒गमूर्ज॑स्वती॒ः पय॑स्वतीः

प्र॒जाव॑तीरनमी॒वा अ॑य॒ख्ष्मामाव॑स्ते॒न ईशत॒ माऽघशग्ं॑ सो रु॒द्रस्य॑

हे॒तिः परि॑वो वृणक्तु ध्रु॒वा अ॒स्मिन्गोप॑तौ स्यात ब॒ह्वीर्यज॑मानस्य प॒शून्पा॑हि
॥

हरि: ओम्॥

हरि: ओम् ।

अग्न॒ आया॑हि वी॒तये॑ गृणा॒नो ह॒व्यदा॑तये । नि होता॑ सथ्सि ब॒र्॒हिषि॑ ॥

हरि: ओम्॥

हरि: ओम् ।

शं नो॑ दे॒वीर॒भिष्ट॑य॒ आपो॑ भवन्तु पी॒तये॑ । शं योर॒भिस्र॑वन्तु नः ॥

हरिः ओम् ॥

भगवते श्रीकामकोटि चन्द्रशेखराय नमः, आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः। चतुर्वेद पारयणम् समर्प्यामि॥

**॥ श्रौतसूत्रम् ॥**

ॐ अथातो दर्शपूर्णमासौ व्याख्यास्यामः । प्रातरग्निहोत्रं हुत्वा अन्यमाहवनीयं प्रणीय।अग्नीर्नन्वादधाति । न गतश्रियोन्यमग्निम् प्रणयति॥ पदम् एकाक्षरम् ब्रह्मम् व्यक्ताव्यक्तम् शनातनम् ।

भगवते श्रीकामकोटि चन्द्रशेखराय नमः, आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः। श्रौतसूत्र पारयणम् समर्प्यामि॥

**॥ पुराणवाक्यम् ॥**

परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्म संस्थापनार्थाय संभवामि युगे युगे ॥

भगवते श्रीकामकोटि चन्द्रशेखराय नमः, आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः। पुराणवाक्यम् समर्प्यामि॥

**॥ आशीर्वाद वचनम् ॥**

ॐ स्वस्ति प्रजाभ्यः परिपालयन्ताम् न्यायेन मार्गेन महीम् महीशाः।

गोब्राह्मणेभ्यः शुभमस्तु नित्यं लोकाः समस्ताः सुखिनो भवन्तु ।।

काले वषन्तु पर्जन्यः पृथिवी सस्यशालिनीः। देशोऽयं क्षोभरहितो ब्राह्मणाः सन्तु निर्भयाः!

अपुत्राः पुत्रिणः सन्तु;  पुत्रिणः सन्तु पौत्रिणः। अधनाः सधनाः सन्तु जीवन्तु शरदां शतम्।। ॐ स्वस्ति मन्त्राः सत्याः सफलाः सन्त्विति भवन्तो महान्तो ऽनुगृह्नन्तु॥ (तथाऽस्तु)

Toronto/Mississauga महा नगरस्य वासीनाम् सर्व KKSF कुटुम्भ भक्तानाम् सहकुटुभस्य भन्धुजनवर्गस्य क्षेम- सथैर्य-वीर्य-विजय-आयुरारोग्य- ऐश्वर्याणां अभिवृद्धिर्भूयास्थाबि भवन्तो महान्तो अनुगृहन्तु ।

(तथाऽस्तु)

सवे जनाः सुखिनो भवन्तु । समस्त सन्मंगलाानि भवन्तु, उत्तरोत्तराभिवृद्धिरस्तु । (तथाऽस्तु)

उत्तरे कर्मणि निर्विघ्नमस्तु। सत्या एषा आहिषः सन्तु ॥

## ॥ सन्गीतम् ॥

## ॥ प्रार्थनाक्षमापणम् ॥

नमस्ते दिव्यरूपाय नमस्ते बोधमूर्तये ।

मन्त्रमयाय देवाय श्रीचन्द्रशेखराय ते नमः ॥

पापोऽहं पापकर्माहं पापात्मा पापसम्भवः ।

पाहि मां कृपया देव शरणागतवत्सल ॥

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।

तस्मात्कारुण्यभावेन रक्ष रक्ष जगद्गुरो ॥

भगवते श्रीकामकोटि चन्द्रशेखराय नमः । प्रार्थनां समर्पयामि ।

पूजान्ते छत्रमाच्छादयामि । चामरे वीजयामि । गीतं श्रावयामि ।

वाद्यं घोषयामि । नृत्यं दर्शयामि । आन्दोलिकामारोहयामि ।

समस्तराजोपचार देवोपचार भक्त्युपचार

शक्त्युपचार षोडशोपचारपूजां समर्पयामि ॥

**क्षमापणम्**

यस्य स्मृत्या च नामोक्त्या तपः पूजा क्रियादिषु ।

न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ।

मन्त्रहीनं क्रियाहीनं भक्तिहीनं महेश्वर ।

यत्पूजितं मया देव परिपूर्णं तदस्तु ते ॥

अनया मया कृता ध्यान आवाहनादि षोडशोपचारपूजया

सर्वान्तर्यामी अनेककोटिब्रह्माण्डप्रमुखः

श्रीकामकोटिपीठरत्नायमानः मुनिमानसहंसः

परब्रह्मस्वरूपी भगवान् श्रीचन्द्रशेखरः सुप्रीणातु ।

## पुनर् नीराजनम्

राजाधिराजाय प्रसग्न्यसाहिने; नमो वयम् वै श्रवणाय कुर्महे

समे कामान्काम कामाय मह्यम्; कामेश्वरो वै श्रवनो ददातु

कुबेराय वै श्रवणाय! महाराजाय नम:

## ॥ प्रायश्चित्तमन्त्राणि ॥

मध्ये स्वरवर्णध्याननियमलोपप्रायश्चित्तार्थं नामत्रयजपं करिष्ये ।

अच्युताय नमः । अनन्ताय नमः । गोविन्दाय नमः ।

अच्युताय नमः । अनन्ताय नमः । गोविन्दाय नमः ।

अच्युतानन्तगोविन्देभ्यो नमः ।

यदक्षरपदभ्रष्टं मात्राहीनं तु यद्भवेत् ।

तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तु ते ॥

विसर्गबिन्दुमात्राणि पदपादाक्षराणि वा ।

न्यूनानि चातिरिक्तानि क्षमस्व पुरुषोत्तम ॥

मन्त्रार्थज्ञानहीनेन कृता दोषाः सुनिश्चयम् ।

अपारकरुणामूर्ते समीक्षे करुणारसम् ॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।

करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि ।

एतत्फलं सर्वं श्रीपरमेश्वरार्पणमस्तु ।



## तोटक अष्टकम्

विदिताखिल शास्त्र सुधाजलधे   महितोपनिषत्कथितार्थनिधे
हृदये कलये विमलं चरणं   भव शंकर देशिक मे शरनम्

करुणावरुणालय पालय मां   भव सागर दु:ख विदून हृदम्
रचयाखिल दर्शन तत्वविदम्   भव शंकर देशिक मे शरनम्

भवता जनता सुहिता भविता   निजबोध विचारण चारुमते
कलयेश्वर जीव विवेकविदं   भव शंकर देशिक मे शरनम्

भव एव भवानिति मे नितरां   समजायति चेतसि कौतुकिता
मम् वारय मोह महजलधिं   भव शंकर देशिक मे शरनम्

सुकृते~धिकृते बहुधा भवतो   भविता समदर्शन लालसता
अतिदीनमिमं परिपालयमां   भव शंकर देशिक मे शरनम्
जगतीमवितुं कलिताकृतयो   विचरन्ति महामहसस्चलत:
अहिमांशुरिवात्र विभाशि गुरो   भव शंकर देशिक मे शरनम्

गुरुपुन्गव पुन्गवकेतन ते   समतामयतां नहि को~पि सुधी:
शरनागत वत्सल तत्वनिधे   भव शंकर देशिक मे शरनम्
विदितानमया विशदैककला   न च किन्चन कान्चन मस्ति गुरो
दृतमेव विधेहि कृपां सहजां   भव शंकर देशिक मे शरनम्